NANDADULAL MANDAL
ASSISTANT PROFESSOR
DEPERTMENT OF EDUCATION
Contuct No- 8617528423/9533608266
nandadulalmandal38@gmail.com

5th Paper Inclusive Educaation

1st Unit.1.2

# समावेशात्मकशिक्षा



1995 तमवर्षस्य असमर्थव्यक्तीनाम् अधिनियमम् (PWD Act-1995) अवलम्ब्य असमर्थतायाः सप्तप्रकाराः सन्ति। ते यथा -

- 1. अन्धत्वम्(Blindness)
- 2.न्यूनदृष्टियुक्तः(Person with low vision)
- 3.श्रवणदोषः(Hearing impairment)
- 4.मानसिकवैकल्यम्(Mental retardation)
- 5.चलनवैकल्पम्(Loco motor Disability)
- 6.मानसिकास्वास्थ्यम्(Mental illness)
- 7.कुष्ठव्याधिमुक्तः(Leprosy cured Person)

- https://youtu.be/rnEFeXvGszc

.

भारतसर्वकारेण एतेषां काठिन्यस्तरं परिशील्य The right of personality with disabilities act 2016 अधिसूचनानुसारे (21) एकविंशतिः विशिष्टबालानाम् एका सूचीनिर्मिता वर्तते। ते यथा-

1.अल्पदृष्टवतां बालकः,
2.अन्धबालकः,
3.कुष्टापगताबालकः,
4.गत्यात्मकं,
5.बामनवालकः,
6.वधिरबालकः,
7.बौद्धिकविकलाङ्गबालकः,

8.मानसिकरोगयुक्तबालकः,
9.आत्मकेन्द्रितस्पक्ट्रामविकारयुक्तः,
10.सेरेब्रालपाल्सी,
11. मस्कुलर डिस्ट्रोफि,
12.कठिनस्नायोविकसमस्यात्मकबालकः,

- **13.विशिष्टाधिगमबालकः,**
- **14.मल्टीपलस्केलेरोसिसबालकः,**

15.मूकबालकः,
16.थैलेसीमिया,
17.हेमोफिलिया,
18.सिकलसेलरोगबालकः,
19.बहुप्रकारकविकलाङ्गः,
20.अम्लाक्रमकबावकः,
21.पाकिंसंसरोगः।

# 1.1. समावेशात्मकशिक्षायाः परिभाषा, सम्प्रत्ययः, महत्त्वं दर्शनश्च।

समावेशिशिक्षायाः तात्पर्यं तया शिक्षया वर्तते यस्यान्तर्गते सामान्यैः सह विशिष्टाक्षमतायुक्तेभ्यः बालकेभ्यः शिक्षणं प्रदीयते।

समावेशिशिक्षामाध्यमेन सर्वप्रथमं छात्राणां बौद्धिकस्तरस्य परीक्षणं क्रियते, तदनन्तरं तदनुकूलशिक्षायाः स्तरनिर्धारणं च क्रियते।

अतः एषा एतादृशी शिक्षाप्रणाली वर्तते या मुख्यतया विशिष्टाक्षमतायुक्तानां बालानां कृते अयोजिता वर्तते।

अतः इयं समेकिता समावेशी वा शिक्षेति कथ्यते।

# समावेशाकत्मकशिक्षायाः अर्थः-

अस्यां शिक्षायां सामान्यैः सह शारीरिक – मानसिक - सामाजिक - शैक्षिकरुपेणबाधितेभ्यः बालकेभ्यः शिक्षायोज्यते।

वस्तुतोहि प्रचलितायां शिक्षायाः मुख्यधारायां सामान्यैः सह तादृशाः बाधिताः अपि शिक्षामाप्नुवन्ति।

समावेशात्मिकायां शिक्षायां प्रतिभासम्पन्नाः सामान्याः बाधिताश्च सर्वे बालकाः परस्परं सम्मिल्य एकस्यां कक्षायां सम्यग्समायोजनेन शिक्षामाप्नुवन्ति।

समायोजनमिदं शैक्षिकं सामाजिकं वा उभौ वा भवितुमर्हति।

अस्यां तेभ्यः बाधितेभ्यः सामान्ये-स्वसन्त्रे च वातावरणे विशिष्टोपकरणैः विभिन्नाधिगमाव्यूहैः शिक्षायाः व्यवस्थापनं क्रियते।

वस्तुतस्तु एषा शिक्षा सामान्यविद्‌यालये एकस्यां कक्षायां सामान्यैः सह बाधितानामपि शिक्षां प्रति संकेतयति

## 1. समावेशिशिक्षायाः विषये “स्टीफन” तथा च “ब्लैकहर्ट” महोदययोः मतं तावत्-

“शिक्षाया मुख्यधारायाः सम्प्रत्ययो बाधितबालानां (पूर्णरुपेण अक्षमःन) सामान्यकक्षासु शिक्षणव्यवस्थाः कर्तव्याः।

एषः समानावसरः मनोवैज्ञानिकचिन्तनाधारितो वर्तते,

यः वैयक्तिकयोजनया उपयुक्तसामाजिकमानकीयकरणाधिगमौ च प्रोत्साहयति इति। ”

उपर्युक्तपरिभाषाधारेण अस्याः शिक्षाया: सन्दर्भे निम्नलिखितानां तथ्यानां विज्ञापनं कर्तुं शक्यते-

- 1. एषा शिक्षा अयोग्यबालानां, विद्यालयस्य विभिन्नानां शैक्षणिक-सामाजिक-संवेगात्मक-व्यावसायिक-शिक्षाकार्यक्रमाणां माध्यमेन सर्वाङ्गीणविकासं करोति।

- 2. अनया शिक्षया सामान्याः विशिष्टाश्च बालकाः परस्परं निकषाम् अनुभूय सहयोगभावनां संवर्धयति।

3. विशिष्टाः बालकाः सामान्यबालकानां शैक्षिकानुभवे भागं सम्प्राप्य समानावसरमाप्नुवन्ति।

4.एषा शिक्षा समावेशी सिद्धान्ताधारिता भवति। वस्तुतोहि भेदभावं विना सामान्य विद्यालये एकस्यां कक्षायां शिक्षामाप्नुवन्ति।

5.एषा शिक्षा
. जीवनयापनस्य कलया सह
तेभ्यः जीवनस्य
विभिन्नासु दशासु
समायोजनमपि शिक्षयति।

# समावेशात्मकशिक्षायाः मुख्यचत्वारः बिन्दवः-

1. मानरीरपणम् (Normalization)
2. 2.संस्थारहितशिक्षा(Deinstitutionalization)
3. 3.शिक्षायाः मुख्यधाराः (Maiorstreaming)
4. 4. समावेशश्च(Inclusion)

# समावेशात्मकशिक्षायाः उद्देश्यानि-

1.सर्वेभ्यः शिक्षाधिकारप्रदानम्।

2.विद्यालये भेदभावं विना सर्वेषां प्रवेशावसरप्रदानम्।

3.परस्परं मैत्रीभावसम्पादम्।

4.अस्याः शिक्षायाः अवधारणानुगुणं पाठ्यचर्यायाः शिक्षणस्य च निर्धारणम्।

5.बालकानामावश्यकतानुगुणं मनोवैज्ञानिकवातावरणस्य निर्माणम्

- 6. कक्षायाम् अधिगमस्य वातावरणव्यवस्थापनम् ।
- 7.निर्देशात्मकसामग्रीभिः परिचयेन आवश्यकानुगुणं क्रियान्वयनम्।

# समावेशात्मकशिक्षायाः समावेशनस्याधारः

- 1. सर्वे बालकाः प्रायशः स्वाभाविकरुपेण अधिगमनार्थम् अभिप्रेरिताः भवन्ति।

- 2. बालकानामधिगमने वैविध्यं भवति।

- 3.अनुभवेन अनुकरणेन चर्चया प्रश्नकरणेन श्रवणेन चिन्तनेन मननेन क्रीडया क्रियाकलापैश्च परस्परं बालकाः परिवेशस्य विषये सूचनामाप्नुवन्ति। एतदर्थमधिगमनार्थं सर्वेभ्यः अवसरप्रदानमावश्यकं भवति।

# वैशिष्ट्यम्-

- 1. एषा सा शिक्षा अस्ति यस्यां विभिन्नरुपेण बाधितानां बालानां शिक्षायाः व्यवस्थापनं सामान्यैः सह क्रियते। अस्यां शिक्षायां बाधितेषु बालकेषु अधिकमवधानं सहयोगं च अध्यापकैः प्रदीयते। वस्तुतोहि एषा बाधितानां पृथकीकरणस्य व्यावहारिकं समाधानं प्रस्तौति।

- 2. शिक्षेयं विशिष्टशिक्षायाः पूरिका अस्ति। शारीरिकरुपेण वा अन्यप्रारुपैः बाधितानां बालकानां प्रवेशः अस्यां शिक्षायां कारयितुं शक्यते। गम्भीरबाधितेभ्यः विशिष्टशिक्षां प्रदाय सम्प्रेषण-सामाजिक-शैक्षिकसद्गुणानां विकासं कृत्वा तेभ्यः अस्यां व्यवस्थायां शिक्षां दातुं शक्यते। (इत्यादयः)

# समावेशात्मकशिक्षायाः महत्त्वम्

ह्युम(HOOM-1964)ब्लूम(Bolum-1968) पीटर-एफ-ड्रकर, एफ ,डब्लू, टेलर इति सदृशाः केचन शिक्षाशास्त्रिनः स्वीकुर्वन्ति यत् विशिष्टशिक्षा स्थाने समावेशात्मकशिक्षायाः प्रवन्धनं भवेत्।

येन सामाजिकसदगुणै- विभूषिताः तादृशाः बाधिताः अपि सामाजिकसामान्यपरिवेशे अल्पप्रतिबन्धिते वातावरणे शिक्षामवाप्तुं सक्षमाः भवेयुः। तथ्यमिदं मनोवैज्ञानिकैः अपि सम्पुष्टमेव । तत्र आरम्भिककाले सामान्यैः सह शिक्षणे तादृशाः बाधिताः हीनतामनुभवन्ति, परं कालक्रमेण सामाजिक-सद्गुणैः विभूषिता भूत्वा सामान्य इव आचरितुं समर्थाः भवन्ति।

# 1. अनया सामान्यविकासः सम्भवति

- अस्यां शिक्षाव्यवस्थायां सामान्यैः सह तादृशेभ्यः विभिन्नप्रकारात्मकस्य विकासस्य अवसरः प्रदीयते।
- यस्मिन् तादृशा- मनः पृथकभावं विहाय सामान्य इव आचारितुं प्रभविन्त।
- येन सामान्यसर्वाङ्गिकविकासः तेषु समुपजायते।

# 2. सामाजिकमेकीकरणं सुनिश्चिनोति

- यदा विशिष्टबालकाः सामान्यैः सह शिक्षामाप्नुवन्ति तदा संसर्गजादोषगुणाः भवन्तीति धिया तेषु अपि सामाजिकसद्गुणानां यथा –मूल्य-नैतिकता-कर्तव्य-प्रेम-सहानुभूति-सहयोगादीनाञ्च संवर्धनं जायते। येन सामाजिकमेकीकरणं सुनिश्चितं भवति।

# 3. अल्पव्ययसाध्यम्

- विशिष्टशिक्षापेक्षया एषा समावेशात्मिकाशिक्षा अल्पव्ययसाध्यं भवति, यतोहि विशिष्टशिक्षायाः प्रशिक्षिताध्यापकस्य, विशेषज्ञस्य चिकित्सकस्य, निर्देशस्य परामर्शकस्य परिवारस्य च आवश्यकतया सह विशिष्टोपकरणस्य महत्यावस्यकता भवति।
- परम् अस्यां शिक्षायां सामान्यव्ययेन तेभ्यः शिक्षायाः व्यवस्थापनं क्रियते।

# 4.सामाजिकगुणस्य वर्धनम्

अस्यां शिक्षायां शिक्षणे विभिन्नाधिगमाव्यूहैः यथा – स्वामित्वाधिगम-समवयस्कप्रबोधनं सामाजिकाधिगम प्रतिफलितशिक्षण-बहुलेन्द्रीयशिक्षण-दलशिक्षणादीनाञ्च आयोजनेन सामान्यसामाजिकसद्गुणाः तेषु स्वाभाविकरुपेण संवर्धन्ते।

# 5. समतायाः सिद्धान्तस्य अनुपालनम्

- भारतस्य संविधानान्तर्गते सर्वेभ्यः नागरिकेभ्यः समताधिकारः प्रदत्तोस्ति। अस्य सम्यग्रूपेण सम्प्राप्तिः अनया शिक्षया एव जायते।

- Hichki Muvie
- .